अनुष्ठान, Tantras : Studies on Their Religion and Literature, Glimpses of Indian Culture, Religion etc.

**शतरञ्जकुतूहलम्**-दशश्लोकात्मके अस्मिन् सम्पादिते ग्रन्थे टीकासहिता शतरञ्जक्रीडा निरूपिता। यथा-

गणेशं नमस्कृत्य विष्ण्वङ्घ्रियुग्मं गुरून्सर्ववन्द्यान्विशालान्दयाब्धीन्।
बुधानां मनोज्ञं प्रशस्तं हि बुद्धेर्बलाख्यं वयं कुर्महे क्रीडनं सत्॥ १ ॥
मतिमतामतिमत्यभिवृद्धये विरचितं शतरञ्जकुतूहलम्।
नरशतान्यनुरञ्जयति ध्रुवं तदुदितं शतरञ्जमतोऽर्थतः॥ २ ॥
सदूर्णामये वस्त्रखण्डे विशाले चतुःकोणयुक्ते समन्तात् समाने।
चतुःषष्टिकोष्ठानि कौषेयसूत्रैर्विधायादिकोणादिकोष्ठादिभाद्याः॥ ३ ॥
ततः क्रीडितव्यं मनीषाविदग्धैर्बलं चाबलं स्वस्य दृष्ट्वा परस्य।
गतिज्ञानमेषां विना क्रीडनं नो भवेत् तत् पुरस्ताद्विचार्यं विशेषात्॥ ६ ॥
गजः सप्तकोष्ठान्तमेकाद्यवक्रो यथापेक्षमूर्ध्वं तिरश्चैति पश्चात्।
हयः सार्धकोष्ठद्वयं वासमन्तात् क्वचिन्मध्यगाम्यष्टकोष्ठानि रक्षेत्॥ ७ ॥
यथापेक्षमेकादिसप्तान्तकोष्ठं व्रजेद् वक्रगामी समन्तान्महाङ्गः।
अमात्यो विना वाजिनश्चैकगत्या समग्रा गतीः सञ्चलेत् सर्वगामी॥ ८ ॥
पुरः पृष्ठतः पार्श्वयोः कोणकेषु चतुर्ष्वेककोष्ठं चलेत् सार्वभौमः।
तुरङ्गस्य गच्छेद् गतिं ह्येकवारं न कस्यापि लग्ना सृतिर्यादवस्य॥ ९ ॥
पदातिश्चलेदग्रतः कोष्ठमेकमृजुर्मारयेद् वक्रगत्या(न्य)कोष्ठे।
न पादं क्वचिद्धारयेत् पृष्ठभागे व्रजेद् यस्य कोष्ठं भजेत्तत्स्वरूपम्॥ १० ॥

## २.४.८. रमारञ्जनमुखर्जी (१९२८-२०११)

१९२८ संवत्सरस्य जनवरीमासस्य प्रथमदिवसे जात आचार्यः रमारञ्जनमुखार्जी कलिकाताविश्वविद्यालयात् १९४६ संवत्सरे स्नातकोत्तरोपाधिं, १९५३ पीएच्डी-उपाधिं यादवपुरविश्वविद्यालयात् १९६४ संवत्सरे डी.लिट्-उपाधिञ्चाधिगतवान्। विविधेषु महाविद्यालयेषु कार्यं कृत्वा १९५६ संवत्सरे यादवपुरविश्वविद्यालयस्य संस्कृतविभागे नियुक्तिं प्राप्तवान्। अनन्तरमयं १९७० संवत्सरे वर्धमानविश्वविद्यालये कुलपतिपदं, १९८४ वर्षे च रवीन्द्रभारतीविश्वविद्यालयमलङ्कृत्य विभिन्नशिक्षानुष्ठानानां

प्रतिष्ठाता अयं तिरुपतिराष्ट्रियसंस्कृतविद्यापीठस्य चानस्लर् अभवत्। प्राच्यपाश्चात्यनन्दनतत्त्वानुसन्धाने नितरां व्रती अयं हिरोसीमाशान्तिपुरस्कार-विश्वभारतीपुरस्कार-राष्ट्रपतिपुरस्कारादिभिः सभाजितः २०१० संवत्सरे पद्मश्रीः उपाधिना समलङ्कृतः। २०११ संवत्सरे मार्चमासस्य त्रयोदशदिनाङ्के संस्कृतजगतः अयं भीष्मपितामहः स्वर्गवासं प्राप्तवान्। हे महाजीवन, कवितासङ्ग्रह, आदि पुस्तकं विहाय अस्य नैके शोधग्रन्थाः सन्ति। काव्यशास्त्रेण सह अरविन्दीयवैदिकव्याख्यानमयं व्याख्याति स्म। मेघदूतस्योपरि अस्य स्वतन्त्रो ग्रन्थो विराजते। रवीन्द्रकथा गानानि अप्येष स्वरुच्या अन्ववदत्। महामानवपुण्यतीर्थे इत्यस्यानुवादो यथा-

हे चित्त मे जागृहि भारतीये त्वस्मिन् महामानवपुण्यतीर्थे।
आर्य्या अनार्य्या अपि वै समेत समेत सर्वे धृतहिन्दुधर्माः।
समेन मोहम्मद्धर्मवन्तः, ख्रीष्टानसंज्ञाः सकलाः समेत।
इंराजपुंसः समुपैत चाद्य समेन विप्राः कृतचित्तशौचाः।
गृह्णीत हस्ते सकलस्य हस्तं नश्यन्तु सर्वे पतितापमानाः॥
अस्मज्जनन्याः अभिषेककार्ये समेत सर्वे द्रुतया च गत्या,
संस्पर्शपूतैः सकलस्य पश्य शुभो घटस्तीर्थजलैर्न पूर्णः।
एताद्य भो भारतपुण्यभूमेरस्मिन् महामानवसिन्धुतीरे।

## २.४.९. मानवेन्दुवानेर्जी (१९३९)

१९३९ क्रैस्ताब्दे जुलैमासस्य द्वादशदिनाङ्के जातो मानवेन्दुवानेर्जी गुप्तवंशस्य शासनकालविषये तात्कालिकशिलालेखादिविषये विशेषाध्ययनं कृत्वा यादवपुरविश्वविद्यालयाद् आचार्यपदेन सेवानिवृत्तः सन् अधुना संस्कृतसाहित्यपरिषदः सचिवरूपेण, एसियाटिकसोसाइटि-इत्यस्य उपाध्यक्षरूपेण च कार्यं निर्वहति। विविधविषयेषु अस्य ४५ शोधपत्राणि २० सम्पादिता ग्रन्थाश्च गौरवं वर्धयन्ति। यथा- A Study of Important Gupta Inscriptions, Sanskrit Inscriptions of Nepal, Historical and Social Interpretations of Gupta Inscriptions, Historicity in Sanskrit Historical Kavyas, Looking into India's past through Epigraphical Literature, हिन्दुशास्त्रमते विवाह, हिन्दुशास्त्रमते उपनयन, Aspects of Sanskrit Architectural Texts, हिन्दुशास्त्रमते श्राद्ध, Abhinayadarpan